(५.४.८५/९५३) इति यदा समासान्तो नास्ति तदा [1]अनेनान्तोदात्तत्वं भवति। तस्मिन् [2]हि सत्यच्-प्रत्ययस्य चित्त्वादेव सिद्धम्। अनित्यश्च समासान्तः इत्येतदेव ज्ञापकम्। अपकुक्षिः। अपसीरः। अपहलम्। अपलाङ्गलम्। अपनाम। सर्वत्र प्रादिसमासो, बहुव्रीहिः, अव्ययीभावो वा। स्फिगपूतकुक्षीणां ग्रहणमबहुव्रीह्यर्थ-मध्रुवार्थमस्वाङ्गार्थं च॥

## अधेरुपरिस्थम्। (१८८/३९२२)

अधेरुत्तरमुपरिस्थवाचि अन्तोदात्तं भवति। अधिदन्तः। [3]अधिकर्णः। अधिकेशः। अध्यारूढो दन्तः इति प्रादिसमासः। [4]अध्यारूढो वा दन्तः इति समानाधिकरण उत्तरपदलोपी समासः। दन्तस्योपरि योऽन्योः दन्तो जायते स उच्यते अधिदन्तः इति। उपरिस्थम् इति किम्? अधिकरणम्॥

## अनोरप्रधानकनीयसी। (१८९/३९२३)

अनोरुत्तरमप्रधानवाचि कनीयः चान्तोदात्तं भवति। अनुगतो ज्येष्ठम् अनुज्येष्ठः। [5]अनुमध्यमः। पूर्वपदप्रधानः प्रादिसमासोऽयम्। [6]अनुगतः कनीयान् अनुकनीयान्। उत्तरपदार्थप्रधानोऽयम्। [7]प्रधानार्थं च कनीयोग्रहणम्। अप्रधानकनीयसी इति किम्? अनुगतो ज्येष्ठः अनुज्येष्ठः॥

## पुरुषश्चान्वादिष्टः। (१९०/३९२४)

पुरुषशब्दोऽन्वादिष्टवाची चानोरुत्तरोऽन्तोदात्तो भवति। अन्वादिष्टः पुरुषः अनुपुरुषः। अन्वादिष्ट अन्वाचितः कथितानुकथितो वा। अन्वादिष्टः इति किम्? अनुगतः पुरुषः अनुपुरुषः[8]॥

## अतेरकृत्पदे। (१९१/३९२५)

अतेः[9] परमकृदन्तं पदशब्दश्चान्तोदात्तो भवति। अत्यङ्कुशो नागः। अतिकशोऽश्वः। पदशब्दः खल्वपि—अतिपदा [10]शक्वरी। अकृत्पदे इति किम्? अतिकारकः।

[७१२] अते[11]र्धातुलोप इति वक्तव्यम्। (म.भा.३.१३९)

इह माभूत्, शोभनो गार्ग्यः अतिगार्ग्यः। इह च यथा स्यात्, अतिक्रान्तः कारकात् अतिकारकः इति॥

## नेरनिधाने। (१९२/३९२६)

नेः परमु[12]त्तरपदमन्तोदात्तं भवति [13]अनिधाने। निधानम[14]प्रकाशता। [15]निमूलम्। न्यक्षम्। नितृणम्। बहुव्रीहिरयं प्रादिसमासो वा। अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम। अनिधाने इति किम्? निवाग्वृषलः। निदण्डः। निहितवाक्, निहितदण्डः इत्यर्थः। निशब्दोऽत्र निधानार्थं ब्रवीति। प्रादयो हि वृत्तिविषये ससाधनां क्रियामाहुः॥

---

1. अनेन नास्ति ब. 2. हि नास्ति ह. 3. अस्य इत्यधिकम् फ. 4. अध्यारूढः नास्ति फ. 5. अनुमध्यः ह. 6. अनुगतः कनीयांसम् अनुकनीयान् क. 7. प्रधानं च फ. 8. अव्ययस्वरापवादोऽयम् इत्यधिकम् ह. 9. उत्तरं फ, उत्तरपदम् ह. 10. गायत्री ह. 11. धातुलोपो वक्तव्यः क. 12. उतरपदं नास्ति फ. 13. अनिधानेऽर्थे च. क. ड. फ. ह. 14. अप्रकाशनम्। ततोऽन्यदनिधानं प्रकाशनम् इत्यर्थः ब, नास्ति ह. 15. निमूल्यम् ह.